श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला–२१

# वाक्यार्थज्योतिः

# Vākyārthajyotiḥ

अङ्कः - 3 वर्षम् :- २०१७ - १८

प्रधानसम्पादकः

प्रो. गोपबन्धुमिश्रः

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकौ

डॉ. डी. एम्. मोकरिया, सहायकाचार्यः

डॉ. बी. उमामहेश्वरी, सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी–वेरावलम्

Scanned by CamScanner

प्रकाशकः -
डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -
डॉ. कार्तिकपण्डया
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2020*

Note : The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

संस्करणम् प्रथमम्
वर्षम् मार्च २०२०
प्रतिकृतय ३५०
ISBN - 978-93-83097-42-5
मूल्यम् - रु. १८०/-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस एपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) [illegible]

Scanned by CamScanner

# सम्बन्धप्रियो भवभूतिः

प्रो.अर्चना दुबे,
अनुस्नातकविभागाध्यक्षा,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम्।

संस्कृतसाहित्ये को नाम पदवाक्यप्रमाणज्ञस्य भवभूतेरभिधानं न वेत्ति। यस्माद्धि भवभूतिः संस्कृतवाङ्मये कश्चन विशिष्टः कविः यः करूणरसमेवैकम्मन्यमानः विराजते। "कारुण्यं भवभूतिरेव तनुते" इत्यादिभिर्वाक्यैः सर्वेऽपि तन्महिमानं निगदन्ति। अस्मिन् शोधपत्रे तस्य महाकवेरनुसारं विविधाः सम्बन्धाः, तेषां सम्बन्धानां च उत्कृष्टता मयाऽत्र प्रत्यपादि। भवभूतिः सम्बन्धस्य मर्यादामपि सम्यक्तया वेत्ति। स्वीये उत्तररामचरिते सः बहून् सम्बन्धान् आदर्शतया प्रणिरूपितवान्। तेषाम् अत्र विवेचनं कृतम् अस्ति।

❖ पतिपत्नीसम्बन्धः

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते ॥ [1]

भवभूतेः प्रणयः यद्यपि उन्मुक्ते वातावरणे आरभते तथापि अन्ततो गत्वा सः दाम्पत्यसूत्रस्य बन्धने परिवर्तितो भवति। तस्य च प्रणयस्य चरमा परिणतिः भवति सन्ततिप्राप्तिः। भवभूतिः पतिपत्न्योः प्रेम्णः सूत्रं सन्ततिं मनुते। सन्ततिः प्रेम्णः बन्धने आनन्दरूपो ग्रन्थिः कथ्यते।

Scanned by CamScanner

अन्तः करणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ॥[2]

भवभूतिः उदात्तं निःस्वार्थं च प्रेमभावं व्याख्यायमानः कथयति यत्- प्रियः किमपि न कुर्वाणोऽपि अन्यस्य प्रियस्य कृते अमूल्यो निधिः वर्त्तते। प्रियसान्निध्यमात्रेण सर्वाण्यपि दुःखानि नश्यन्ति।

न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥[3]
आविवाहसमयाद् गृहे वने शैशवे तदनु यौवने पुनः।
स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥[4]

यदा रामः लोकापवादात् सीतां वनं प्रेषयति तदा सः स्वमात्मानं चाण्डालं विषवृक्षं च कथयति। तथा सीताचरणयोः शिरः संस्थाप्य भृशं रोदिति। यथा – "सीतायाः पादौ शिरसिकृत्वा अयं पश्चिमस्ते रामः शिरसा पादपङ्कजस्पर्शः" ( इति रोदिति )।[5] रामः लोकानुरञ्जनाय[6] सीतां त्यक्तवान्। यदा सः शम्बूकं हन्तुं पञ्चवटीं गच्छति तदा सीतां संस्मरन् मूर्च्छितो भवति।

दलति हृदयं गाढोद्वेगं द्विधा तु न विद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतना।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।[7]

[2] उत्तररामचरितम् - ३/१७।
[3] उत्तररामचरितम् - २/१९।
[4] उत्तररामचरितम् - १/३७।
[5] उत्तररामचरितम् - पृ.सं. ११२।
[6] स्नेहं दयां च सौख्यं च यदि वा जनकीमपि।
[7] उत्तररामचरितम् - ३/३१।

Scanned by CamScanner

सीतां विना स्वस्य जीवनं शून्यमात्मानं च भाग्यहीनम्मन्यमानः विलपन् मूर्च्छितो भवति। यथा –

हा हा देवि ! स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥[8]

रामसीतयोः परस्परम् अत्यन्तं प्रेम वर्त्तते। सीता रामं नोपालम्भते किन्तु आत्मानमेव अपराधिनीं मनुते। यथा "हा धिक् हा धिक् मां मन्दभागिनीं व्याहृत्यामीलितनेत्रनीलोत्पलो मूर्च्छित एव"।[8]

रामे मूर्च्छिते सति सीता अश्रूणि मुञ्चन्ती स्वस्पर्शेन रामं चेतनीचिकीर्षति। अन्येषु जन्मसु रामस्य दर्शनं पुनरसम्भवं दुर्लभं च मनुते। यथा – " किमिति वज्रमयी जन्मान्तरेष्वपि पुनरप्यसम्भावित-दुर्लभदर्शनस्य मामेव मन्दभाग्यामुद्दिश्यैवं वत्सलस्यैवंवादिन आर्यपुत्रस्योपरि निरनुक्रोशा भव्विष्यामि। अहमेवैतस्य हृदयं जानामि ममैषः। [10]

रामसीतयोः दाम्पत्यं गाढं निर्बाधश्चास्ति अतः सीता अश्वमेधयज्ञे स्वर्णमूर्त्याः[11] वृत्तान्तं ज्ञात्वा प्रसन्ना वाष्पपूरितलोचना भवति। रामसीतयोः परस्परम् एकनिष्ठम् अनितरसाधारणं प्रेम दाम्पत्यस्य चरमोत्कर्षं प्रकटयति।

❖ वधूश्वश्वोः वधूश्वशुरयोः सम्बन्धः –

सीतायाः तिस्रः अपि श्वश्र्वः तस्यां स्नेहातिरेकं दर्शयन्ति। अत एव ताः अष्टावक्रेण सह ऋष्यश्रृङ्गाश्रमं गताः अपि ततः सीतायाः गर्भदोहदं नाम तस्याः प्रत्येकाम् इच्छां पूरयितुं रामं

Scanned by CamScanner

प्रति सन्देशं प्रेषयन्ति। अथ च सीतायाः निर्वासनसन्देशं श्रुत्वा पुनरयोध्यामपि गन्तुं ताः नेच्छन्ति। रामं प्रति च स्वीयान् रोषभावान् प्रकटयन्ति।

कौशल्या नवविवाहितायाः सीतायाः मुखमण्डलं स्मरन्ती कथयति– "हा वत्से जानकि ! कुत्रासि ? स्मरामि ते नवविवाहलक्ष्मी-परिग्रहैकमण्डनं प्रस्फुरच्छुद्धविहसितं मुग्धमुखपुण्डरीकम्, आस्फुरच्चन्द्रिकासुन्दरैरङ्गैरुल्लासय, जाते, पुनरप्युद्योतयोत्सङ्गम्, सर्वदा महाराजो भणति एषा रघुकुलमहत्तराणां वधूरस्माकं तु जनकसम्बन्धेन दुहितैव"।[12]

न केवलमधिराज्ञी कौशल्या एव अपितु महाराजदशरथोऽपि सीतायां पुत्रीवत् स्निह्यति। दशरथः सीतां रघुकुलस्य पूर्वजानां पुत्रवधूं तथा स्वात्मनः पुत्रीं कथयति यथा – "एषा रघुकुलमहत्तराणां वधूरस्माकं तु जनकसम्बन्धेन दुहितैव"। यथा दशरथस्य पञ्चस्वपत्येषु सुबाहुशत्रुः रामः प्रियः आसीत् तथैव चतसृषु वधूषु सीता एव पुत्रीवत् प्रिया आसीत्।

पञ्चप्रसूतेरपि तस्य राज्ञः प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि यथैव शान्ता प्रिया तनूजाऽस्य तथैव सीता ॥[13]

कौशल्या तु सीतानिर्वासने आत्मानमेव कारणं मत्वा कथयति –

"कथं नु खलु वत्साया मे वध्वा एवं गते तस्य राजर्षेः मुखं दर्शयामः"।[14]

Scanned by CamScanner

राजर्षिजनकः वाल्मीक्याश्रमे सीतायाः निर्वासनदुःखेन सन्तप्तः सन् विलपन् कथयति यत्- सीतानिर्वासनकर्मेदं महदनर्थकं हृदयव्रणकारि व्यथादायकं हृदयविदारकं वर्त्तते। तेन मे शोकः बहुषु दिवसेष्वतीतेष्वपि क्रकच इव शनैः मर्मस्थलं कृन्तन् न व्यपगच्छति।

अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता।
पटुर्धारावाही नव इव चिरेणाऽपि हि न मे
निकृन्तन् मर्माणि क्रकच इव मन्युर्विरमति ॥[15]

राजर्षिजनकः सीतायां वात्सल्यकारणेन तस्याः बाल्यकालस्य चञ्चलतां मुग्धतां च संस्मरन् वसुन्धरामुपालभमानः वदति – पृथ्वि त्वं सीतायाः माहात्म्यममानुषत्वं च जानासि न केवलं त्वमेव वह्निः, मुनयः, वसिष्ठगृहिणी अरुन्धती, गङ्गा, वसिष्ठः, दीप्तिशीलः भास्करश्च यस्याः माहात्म्यं विदन्ति। तथापि त्वं पुत्र्याः सीतायाः अग्निशुद्धिं परित्यागं च कथं सोढवती।

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः।
विद्यां वागिव यामसूत भवती शुद्धिं गतायाः पुन-
स्तस्यास्त्वद्दुहितुस्तथा विशसनं किं दारुणे मृष्यथाः ॥[16]

राजर्षिः जनकः सीतायाः निर्वासने व्यथमानः स्वमात्मानमेव मन्दभाग्यम्मन्यमानश्च कथयति यत् – अहं तु आत्महत्याम् अपि कर्त्तुं न शक्नोमि। यतो हि आत्मघातिनो जनाः प्रेत्य तादृशेषु अन्धकारयुतेषु

Scanned by CamScanner

लोकेषु यान्ति , यत्र सूर्योऽपि न प्रकाशते।[17] राजर्षिरस्मि अतः ममैषां पुरतः रुदितुमपि समर्थो नास्मि। सोऽयं विदेहराजः जनकः पुत्रीं सीतां प्रति अत्यन्तं स्नेहभावं दर्शयति। सीतायाः दुःखेन सोऽपि दुःखं व्यथां चाऽनुभवति।

❖ जननीपुत्रसम्बन्धः

सीता स्वपुत्रौ कुशलवौ अनन्यतया प्रीणाति। सा च वात्सल्यमूर्त्तिरस्ति अतः स्वार्थं परित्यजन्ती पुत्रौ शिक्षायां पारंगतौ भवेताम् इति प्रकल्प्य स्वस्माद्दूरे वाल्मीकेराश्रमे तौ स्थापयति। सीता हस्तिकलभकम् अवलोक्य कुशलवौ स्मरति। तदानीं सा तमसां प्रति कथयति अयं कलभकः एतावान् वर्धितः न वेद्मि एतावत्सु दिवसेषु मे कुशलवावपि कियन्तौ वर्धितौ स्याताम्। सा स्वां मन्दभागिनीं कथयति। यस्याः न केवलं पतिविरहः अपितु पुत्रविरहोऽपि अस्ति। यथा "ईदृश्यस्मि मन्दभागिनी , यस्याः न केवलमार्यपुत्रविरहः, पुत्रविरहोऽपि"।

❖ सम्बन्धिसम्बन्धिन्योः सम्बन्धः

उत्तररामचरिते भवभूतिः सम्बन्धिसम्बन्धिन्योः सम्बन्धं अत्यन्तमुत्कृष्टया पद्धत्या उद्भावयति। सः सम्बन्धमात्रम् न अपितु मैत्रीवत् प्रतिभाति। राजर्षिर्जनकः कौशल्यां प्रियसखी इति सम्बोधयति। दशरथस्य गृहे लक्ष्मीसदृशी न अपितु लक्ष्मीरेव इयमस्ति। यथा -

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा।
कष्टं बतान्यदिव दैववशेन जाता

Scanned by CamScanner

दुःखात्मकं किमपि भूतमहा विकारः ॥[18]

महाराजः जनकः कौशल्यामवलोक्य व्यथितो भवति। जनकः एव न अपितु कौशल्या अपि महद्दुःखम् अनुभूयमाना भवति। यथा कश्चिद्दुःखितो जनः सम्बन्धिनं गृहसदस्यं वा दृष्ट्वा स्वीयं दुःखं गोपितुं समर्थः न भवति तथैव जनकस्यागमनस्य सूचनाम् अवाप्य सा स्वयं चेतनाम् आप्तुम् असमर्था भवति। यथा -

सन्तानवाहीन्यपि मानुषाणां दुःखानि सम्बन्धिवियोगजानि।
दृष्टे जने प्रेयसि दुस्सहानि स्रोतस्सहस्रैरिव सम्प्लवन्ते ॥[19]

❖ सम्बन्धिनोः सम्बन्धः

राजर्षिः विदेहराजो जनकः कौशल्यां दशरथविरहितामवलोक्य दशरथं संस्मरन् कथयति यत् सः श्लाघ्यः सम्बन्धी , प्रियं मित्रम् , हृदयस्वरूपः , साक्षादानन्दः , तथा समग्रस्य जीवनस्य फलीभूतः दशरथः मम शरीरम् आत्मा एव वा नासीत् अपितु ततोऽप्यधिकप्रियतरः आसीत् साक्षाद्ब्रह्मस्वरूपः आसीत्। महाराजः दशरथः मम सर्वस्वम् आसीत्। यथा -

स सम्बन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं
महाराजः श्रीमान् किमिव मम नासीद् दशरथः ॥[20]

महाराजः दशरथः राजर्षिः जनकश्च सम्बन्धिनावेव न अपितु परस्परं सुहृदावपि आस्ताम्। अत एव यदा दशरथकौशल्ययोः प्रणयकलहो भवति स्म तदा द्वावपि जनकम् एव उपालभेते। अनेन व्यवहारेण एव ज्ञायते यत् जनकदशरथयोः हृदयम् अभिन्नम् आसीत्।

Scanned by CamScanner

दशरथस्य अभावे तस्य स्मरणं विधायैव जनकस्य हृदयमवस्कन्दते। यथा -

यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत्स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥[21]

भवभूतिः सम्बन्धिनोः सम्बन्धम् उत्कृष्टतया प्रस्तुतवान् अस्ति।

❖ गुरुशिष्यसम्बन्धः –

उत्तररामचरिते शिष्यस्य गुरोः प्रति आदरभावः अथवा पितृतुल्यो भावः परिलक्षितो भवति। गङ्गापृथिव्यौ द्वावपि मातरौ सीतायाः प्रसवस्य केषाञ्चन दिवसानां समनन्तरं लवं कुशं च वाल्मीकेराश्रमे अधिष्ठापयतः। वाल्मीकिरेव तयोः अनुपालनं पोषणं च करोति। पितृतुल्येन भावेन सः कुशलवौ संरक्षयन् तयोः चूडाकर्म कृत्वा आन्वीक्षिकीवार्त्तादण्डनीतीः च अध्यापयति। एवमेकादशे वर्षे तयोरुपनयनसंस्कारं कारयित्वा वेदविद्यामपि पाठयति। वेद्यविद्यायां पारङ्गतीकृत्य पितुः गुरोः च दायित्वं वाल्मीकिः ऊढवान्। आत्रेयी अपि गुरोर्महिमानं वर्णयन्ती कथयति यत्-

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहेमणिर्न मृदादयः ॥[22]

❖ नृपस्य सेवकेन प्रजाभिश्च सम्बन्धः -

नृपः सन्नपि रामः पितुः समवयस्कानां सेवकानां प्रति आदरपूर्णं व्यवहारं करोति। तथा महाराज इत्यस्य स्थाने

Scanned by CamScanner

पूर्वाभ्यासानुगुणं राम इत्येव सम्बोधयन्तु इति वदति। यथा- रामः – आर्य ! ननु रामभद्र ! इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य तद्यथाभ्यस्तमभिधीयताम्।

उत्तररामचरितस्य नायकः रामः सर्वेषामादर्शानां पुञ्जीभूतः आसीत्। प्रजापलकत्वेन रामः अनुपमोऽस्ति यतो हि सः प्रजानुरञ्जनाय एव स्नेहं दयां सौख्यं जानकीमपि त्यक्तुं समर्थः अस्ति।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥[23]

❖ दौहित्रपौत्रसम्बन्धः

पितामही पितामहश्च, मातामही मातामहश्च स्वपुत्रपुत्र्योरपेक्षया पौत्रेषु दौहित्रेषु च अधिकं स्निह्यन्ति। एतादृशं हिन्द्याम् आभाणकम् अस्ति – " मूलधन से ज्यादा व्याज प्यारा होता है"। कौशल्याजनकावपि पौत्रयोः दौहित्रयोश्चः अत्यन्तं स्निह्यतः। अतः कौशल्या यदा बालसमूहे लवं प्रथमवारं पश्यति तदा तस्मिन् रामस्य एव प्रतिकृर्तिं पश्यति। कौशल्या तं चक्षुषोः अमृताञ्जनमिव मनुते। लवे अङ्के आरोपिते सति तस्य कमलकोमलस्पर्शः रामस्पर्शवदेव प्रतीयते स्म। यथा-

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
वटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्।
पुनरपि शिशुर्भूत्वा वत्सः स मे रघुनन्दनः
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥[24]

कौशल्या यदा हनुना मुखमुन्नीय लवं पश्यति। तदा तन्मुखे सीतायाः

दौहित्रयोः अत्यन्तं स्नेहः वर्त्तते। अतः लवं चिरं दृष्ट्वा तं विनयेन शीतलम्, मौग्ध्येन कोमलम्, महिम्नश्चोत्कर्षं मनुते। तत्सर्वमपि सूक्ष्मदर्शिन एव याथातथ्येन ज्ञातुमर्हन्ति सामन्यजनाः न। लवः हर्षादीनाम् आवेगकारणात् जनकस्य मनः अयोधातुवदाकर्षति। यथा -

महिम्नामेतस्मिन्विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।
मनो मे सम्मोह स्थिरमपि हरत्येष बलवा-
नयोधातुं यद्वत्परिलघुरयस्कान्तशकलः ॥[25]

❖ आवुत्तभगिन्योः सम्बन्धः

ऋष्यशृङ्गस्य आश्रमादष्टावक्रः यदा आयाति तदा सीता गुरुजनानां मातॄणां च कुशलं पृष्ट्वा शान्तायाः विषये पृच्छति। अपि स्मरति ननान्दा शान्ता अस्मान् ? इति। रामः ऋष्यश्रृङ्गस्य शान्तायाः च कुशलं पृच्छति यथा -"निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यश्रृङ्ग आर्या च शान्ता।[26] ननान्दुः पत्या सीतायाः स्थितिः दृष्ट्वा रामः सीतायाः मनोरञ्जनाय आदिष्टः। सीतायाः कृते पुत्रवत्याः आयुष्मत्याश्च आशीर्वचननानि च दत्तानि। यथा - "अष्टावक्रः – ननान्दुः पत्या च देव्याः सन्दिष्टमृष्यश्रृङ्गेण वत्से कठोरगर्भेति नानीतासि। वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः। तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्याम" इति।[27]

❖ भ्रातृभ्रातृजाययोः यातृदेवरयोः सम्बन्धः

सीता यातृदेवरयोः अत्यन्तं स्नेहं करोति। चित्रदर्शनसमये उर्मिलां दर्शयित्वा लक्ष्मणेन विनोदं करोति। लक्ष्मणः सीतां मातरं

चित्रेषु वनवासकाल [illegible] च

प्रसन्नमनस्का भवति

भ्रातृप्रेम – उत्तररामचरिते एकत्र रामलक्ष्मणयोः भ्रातृप्रेम चित्रदर्शने वनवासकृतसेवाभिः उद्भाव्यते। तर्हि अन्यत्र कुशलवयोरपि भ्रातृप्रेम आदरभावश्च दृश्यते। यथा - अस्त्यार्यः कुशो नाम।

❖ नार्याः नारीं प्रति सम्बन्धः

अरुन्धती गुरुमाता अस्ति तथाऽपि गुणानां कारणात् सीतां पूजनीयां मनुते। यतो हि गुणाः एव पूजास्थानं भवन्ति न तु लिङ्गं न च वयः यथा -

> शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
> विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
> शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
> गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥ [23]

❖ नदीपृथिव्योः सम्बन्धः

सीता प्रसववेदनया अत्यन्तं पीडिता अधिगङ्गं पतति। तत्रैव पुत्रद्वयं जनयति। सा पुनः भगवत्या वसुन्धरया भागीरथ्या च अनुग्रहीता पाताललोकं गच्छति। निर्वासितायाः सीतायाः रक्षणार्थं प्रकृत्याः द्वे मूर्त्ती स्तः गङ्गापृथिव्यौ। भागरथी तु सीताम् लोकैरदृश्यां भवितुम् आशीर्वादमपि प्रयच्छति। कथयति च त्वां साधारणमनुष्याः एव न वनदेवताः अपि द्रष्टुम् असमर्थाः भविष्यन्ति। "न च

Scanned by CamScanner

त्वामवनिपृष्ठचारिणीमस्मत्प्रभावाद् वनदेवता अपि द्रक्ष्यन्ति किं पुनर्मर्त्याः।[29]

गङ्गा सीतायाः संरक्षकत्वेन तमसां नियुङ्क्ते तेन कारणेन तमसा सीतया सह एव भवति। यदा सीता रामस्य दशामवलोक्य मूर्च्छिता भवति तदा तमसा एव तां सान्त्वनां ददाति। रामे मूर्च्छिते सति तमसा एव सीताम् उचितं परामर्शं ददाति यत् – हे कल्याणि त्वमेव ननु जगत्पतिं सञ्जीवय , यतो हि ते प्रियस्पर्शेन एव सः चेतनाम् अवाप्तुं समर्थः अस्ति। अतस्त्वमेव रामं सचेतनं कर्तुं समर्था असि। गङ्गातमसे एव न अपितु मुरलागोदावर्याविपि इत्थं चतस्रः नद्यः सीतायां पुत्रीवत् स्नेहं कुर्वन्ति।

❖ मानवेतरः सम्बन्धः

भवभूतिः मानवीयान् सम्बन्धान् एव न अपितु मानवस्य प्राकृतिकैः पदार्थैः सह सम्बन्धोऽपि स्वीये उत्तररामचरिते निरूपितवान्। सीताऽपि प्रकृतिप्रिया आसीत् अत एव चित्रदर्शनप्रसङ्गे यदा पञ्चवटीप्रभृतीनां चित्रम् अवलोकयति तदा तत्रत्यं नैसर्गिकं सौन्दर्यं सीतायाः चित्तम् आकर्षति। सीता वनवासकाले पशुपक्षिणः वृक्षान् च पुत्रतुल्यान् मन्वाना तान् परिरक्षयति। यथा-

सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै-
रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत् ॥[30]

निर्वासनकाले पुनः दण्डकारण्ये स्वपालितं वर्धितं
करिकलभकं स्वपत्न्या सह जलविहारं कुर्वाणम् अन्येन समदेन

हस्तिशावकेन आक्रान्तं दृष्ट्वा भीत्या रामं तस्य हस्तिशावकस्य रक्षणार्थम् आह्वयति। किन्तु रामस्य तत्र असत्वादेव तस्य पुत्रतुल्यस्य कलभकस्य रक्षणे असमर्था सीता मूर्च्छिता भवति। यथा – ( ससंभ्रमं कतिचित्पदानि गत्वा ) " आर्यपुत्र। परित्रायस्व - परित्रायस्व मम तं पुत्रकम्। हा धिक्, हा धिक्। तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र"।[31] ( इति मूर्च्छिता )।

सीता एव न रामोऽपि प्रकृतिं प्रीणाति स्म। एतदर्थमेव यदा सः पुनः यदा दण्डकारण्यं गच्छति तदा सीतया पालितानां हस्तिमृगमयूरप्रभृतीनां चञ्चलानां नेत्राणाम् एवञ्च भ्रुवाम् ताण्डवनृत्येन संशोभितयोः सीतायाः पल्लवसदृशयोः हस्तयोः तालिकाभिः नृत्यन्तं पुत्रवत् पालितं मयूरम् एवम् अन्यान् वृक्षाँश्चावलोक्य स्नेहपूर्णमनाः भवति।

भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः
प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥[32]

सीतया पालितो मयूरः सीता यान् कदम्बवृक्षान् अभिसिञ्चन्ती वर्धितान् कृतवती सीतायाः गमनानन्तरं तेषु कदम्बवृक्षेष्वेव सीतामनुभूय आनन्दम् आप्नोति। यथा -

स्मरति गिरिमयूर एष देव्याः स्वजन इवात्र यतः प्रमोदमेति ॥[33]

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं

Scanned by CamScanner

त्वं कालेन तथाविधोऽप्यपहृतः संबन्धबीजं च तद्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग्जीवितम् ॥[34]

सामान्यतः लोकस्य प्रसिद्धा रीतिरस्ति यत् कन्यायाः पितृप्रभृतयो परिजनाः जामातुरात्मीयानां जनानां प्रति सम्मानभावयुताः भवन्ति। किन्तु जनकदशरथयोर्व्यवहारः एतस्माल्लोकव्यवहारात्सर्वथा विपरीतम् आसीत्। यदि समाजे वरस्य पिता कन्यायाः पितरम् प्रति आदरभावसहितं व्यवहारं कुर्यात् तर्हि विषमता एव समाप्यते। सम्बन्धदृष्ट्या चतुर्थोऽङ्कः विलक्षणः। निष्कर्षतः निश्चप्रचमेतद्वक्तुं शक्यते यद्भवभूतिः मानवीयसम्बन्धस्य कविरस्ति। भवभूतेः मानवीयः सम्बन्धः समाजस्य आधारस्तम्भभूतः अस्ति। येन आधुनिकोऽपि समाजः आदर्शपृष्ठभूमिनिर्माणं कृत्वा मानवीयसम्बन्धान् स्थापयितुं समर्थः अस्ति।

भवभूतिः स्वकीयमपि व्यक्तित्वं जीवनञ्च उत्तररामचरिते प्रकारान्तरेण उक्तवान्। न केवलं भाग्यवादी नाटककारः अस्ति। अथ च अपरेषां सम्बन्धम् अपि सम्यक्तया परिपालयितुं जानाति। वस्तुतः उत्तररामचरितस्य प्रत्येकेषाम् अपि अङ्कानां विशिष्टं महत्वम् अस्ति। परन्तु चतुर्थे अङ्के कवेः मौलिक्या प्रतिभया सह तस्य व्यक्तित्वस्य जीवनस्य अपि संस्पर्शः भवेत् समाजस्य कृते एकः सुदृढः सम्बन्धधरातलः सज्जीभवेत् इति द्योतितो भवति। यदि उत्तररामचरितम् अनया दृष्ट्या पठ्यते तर्हि एतस्य सार्थकत्वं सिद्ध्यति। एवम्प्रकारेण दृश्यकाव्येषु मानवजीवनमूल्यानां स्थापनं दृग्गोचरीभवति। एतस्य च उत्कृष्टतमम् उदाहरणम् उत्तररामचरितम् अस्ति।

Scanned by CamScanner